# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा, ओक्टोबर्- २०१९

| | | |
|---|---|---|
| **कक्षा:**- **शास्त्री-१** (SEM-1) | **प्रश्नपत्रम् - ६** | **गुणाः - ७०** |
| **विषयः: सर्वदर्शनम्** | (CC-1.1.2) | **समयः – ११:३० त: २:३०** |
| **दिनाङ्कः :१५/१०/२०१९** | **ग्रन्थः – साङ्ख्यतत्त्वकौमुदी** | |

---

**विभागः-१**

प्रश्नः-१ निम्नलिखितेषु द्वयोः व्याख्यां कुरुत। (१०)

(१) 'मूलप्रकृतिरविकृतिर्महदाद्या: प्रकृतिविकृतय: सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृति: पुरुष: ॥ व्याख्यात।

(२) 'आप्तश्रुतिराप्तवचनं तु' व्याख्यात।

(३) त्रिविधमनुमानं प्रतिपादयत।

प्रश्नः-२ निम्नलिखितयोः एकस्य व्याख्यां विशदतया ददतु। (१०)

(१) दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात्॥ विशदीकुरुत।

(२) असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्॥

**विभागः-२**

प्रश्नः-३ निम्नलिखितेषु द्वयोः व्याख्यां यच्छत। (१०)

(१) सत्कार्यवादं यथाग्रन्थं विवृणुत ।

(२) साङ्ख्यमतानुसारं पुरुषबहुत्वं साधयत ।

(३) गुणत्रयलक्षणानि यथाग्रन्थं विवृणुत।

प्रश्नः-४ निम्नलिखितयोः एकस्य व्याख्यां विशदतया ददतु। (१०)

(१) सङ्घातपरार्थत्वात् त्रिगुणादिविपर्यादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥

(२) सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥

## विभागः-३

प्रश्नः-५ निम्नलिखितेषु द्वयोः व्याख्यां कुरुत। (१०)

(१) प्रकृतेर्महांस्ततोऽहंङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि॥

(२) बुद्धिधर्माः यथाग्रन्थं विशदयत।

(३) 'सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्'।

प्रश्नः-६ निम्नलिखितयोः द्वयोः एकस्य व्याख्यां विशदतया ददतु। (१०)

(१) अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥

(२) उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियम्।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च॥

प्रश्नः-७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु। (१०)

(१) युगपच्छब्दार्थः कः?

(२) वृत्तिः कतिविधा? का च सा ?

(३) प्रमेयसिद्धिः कथं भवति?

(४) कण्ठताल्वादिस्थानमिन्द्रियं किम्?

(५) साङ्ख्यमते तत्त्वानि कति?

(६) लिङ्गशब्दस्य कोऽर्थः?

(७) सत्कार्यवादिनः के?

(८) विशेषतोऽनुमानं कतिविधम्?

(९) साङ्ख्यमते प्रमाणानि कति प्रसिद्धानि?

(१०) कः संयोगः?

(११) सत्त्वं किम्?

(१२) कार्यस्य अव्यक्तं कथं सिद्ध्यति?

(१३) भूतानि कानि?

(१४) साङ्ख्यदर्शनस्य प्रवर्तकः कः?

(१५) कानि एकादशेन्द्रियाणि?

★★★★★★★★★★★

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा-ओक्टोम्बर्,२०१९

**कक्षाः**- **शास्त्री-१** (SEM-1) | **प्रश्नपत्रम् - ६** (CC-1.1.2) | **गुणाः - ७०**

**विषयः: सर्वदर्शनम्** | **समयः -**

**दिनाङ्कः :**

**(ग्रन्थः – साङ्ख्यतत्त्वकौमुदी)**

प्रश्नः - ७

## समाधानानि

१. एककालावच्छेदेनेत्यर्थः।

२. द्विविधा, साधारणी असाधारणी च।

३. प्रमाणाद्भवति।

४. वाक्।

५. पञ्चविंशतिः।

६. व्याप्यमित्यर्थः।

७. साङ्ख्याः।

८. त्रिविधम्।

९. त्रीणिप्रमाणानि।

१०. अप्राप्तिपूर्विका प्राप्तिः संयोगः।

११. लघु प्रकाशकम्।

१२. कारणौणात्मकत्वात्।

१३. गगनपवनाऽनलसलिलाऽवनयः भूतानि।

१४. महर्षिकपिलः।

१५. ज्ञानेन्द्रियपञ्चकं, कर्मेन्द्रियपञ्चकं मनश्च।